International Journal of Sanskrit Research 2020; 6(5): 384-386

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(5): 384-386
© 2020 IJSR
www.anantaajournal.com
Received: 07-08-2020
Accepted: 28-08-2020

**नारायन सामाइ**
शोधच्छात्रः, साहित्यविभागः
राजीवगान्धीपरिसरः, शृङ्गेरी,
कर्णाटकम्, भारत

Corresponding Author:
**नारायन सामाइ**
शोधच्छात्रः, साहित्यविभागः
राजीवगान्धीपरिसरः, शृङ्गेरी,
कर्णाटकम्, भारत

# प्राचीनभारते राज्यानुशासनस्यावधारणा, आधुनिकभारतीयराज्यानुशासनप्राचीनभारतीयराज्यानुशासनयोःतुलनात्मकं स्वरूपं, क्षेत्रं, महत्त्वं च॥

**नारायन सामाइ**

## प्रस्तावना

अस्माकं इयं पृथिवीमाता एका विशिष्टा अनुपमा च कृतिर्वर्तते विधातुः या सौन्दर्यस्य एका महती स्रोतस्विनी अस्ति। तां मातरं रक्षितुं भगवता मानवः अपि सृष्टः। यः मानवरूपी तत्परः जीवः स्वीयबुद्ध्या पृथिव्याः सौन्दर्यतत्त्वं, मानवसंस्कृतिं च रक्षितुं काञ्चित् नियमावलीं आविष्करोति। सा च नियमावली कस्यचित् देशस्य उन्नत्यर्थं सुव्यवस्थार्थं च तस्यैव देशस्य निर्दिष्टः शासन-प्रणाली इत्याख्या परिचिता भवति । अस्याः शासनप्रणाल्याः महत्त्वं स्वीकुर्वन्तः प्राचीनभारतीयाचार्याः राजशास्त्र-प्रणेतारः बहून् धर्मग्रन्थान् रचितवन्तः, येन माध्यमेन सुव्यवस्थारूपेण राज्य-सञ्चालन-व्यावस्था विकसिता परिचालिता च भवति। राज्य-सञ्चालनस्य इयमेव विद्या "राज्यानुशासनं" नाम्ना अभिहिता भवति।

प्राचीनभारतीयस्य राज्यानुशासनस्य अध्ययनार्थं मुख्यस्रोतो भवति "वेदः"। वेदः विद् धातुना निष्पन्नः भवति, यस्यार्थः भवति ज्ञानम्। परन्तु वेदस्य प्रयोगः सर्वेषु ज्ञानाधारेषु न भवति। वेदस्य प्रयोगः केवलं तस्य ज्ञानस्य कृते क्रियते, यस्य ज्ञानस्योत्पत्तिः हिन्दुनां धार्मिकविश्वासेन, समाधिस्थस्य अथवा तपसि लीनस्थस्य ऋषेः शुद्धान्तःकरणात् ईश्वरप्रेरणया भवति। सः वेदः मुख्यतया चतुर्विधः। ऋग्वेदः, सामवेदः, यजुर्वेदः, अथर्ववेदश्चेति। तेषु ऋग्वेदाथर्ववेदयोः विशिष्टतया राजनैतिकचित्रणं परिदृश्यते। ऋग्वेदस्य प्रथमदशम-मण्डलयोः राजनैतिकविषयः अधिकतया अस्ति। अनयोः द्वयोः मण्डलयोः सभा, समितिः, विदथः, गणः, जनजातीयसंस्था, ब्राह्मणादीनां वर्गः, राजादीनां प्रसङ्गः उल्लिखितः अस्ति। सामवेदयजुर्वेदाथर्ववेदादीनां संहिताषु, ब्राह्मणेषु, आरण्यकेषु (ऐतरेयब्राह्मणशतपथब्राह्मणयोः) राज्याभिषेकः, राज्यारोहणः तत्सम्बद्धानि याज्ञिककर्मकाण्डानि अधिकतया वर्णितानि सन्ति। श्रौतसूत्रगृहसूत्रधर्मसूत्रेषु अपि राज्यानुशासनं परिदृश्यते। बोधायनधर्मसूत्रे ज्ञायते यत् राजा प्रजायाः हस्तात् करं स्वीकृतवान् तथा च प्रजाया रक्षणवेक्षणकर्तव्यः अप्यत्र वर्णितः अस्ति [1]। गौतमधर्मसूत्रे पराजितं शत्रुं प्रति विजेतुः व्यवहारस्य विषय अपि उल्लिखितः।[2] मनुस्मृतेः सप्तमाध्याये राज्यानुशासनस्य वर्णनं बहु महत्त्वपूर्णमस्ति। अस्मिन्नध्याये राज्ञः कर्त्तव्यं, कराधानं, दण्डादयः सिद्धान्ताः अपि सूक्ष्मेक्षिकतया विवेचिताः। रामायणमहाभारतयोः अपि राजनैतिकप्रसङ्गः बहुवारमागतः। कौटिल्यस्य अर्थशास्त्रम् अपि एकं राजनीतिशास्त्रं भवति।

प्राचीनभारतीयसाहित्ये राजनीतिः इत्ययं शब्दः बहुभिः अभिहितः भवति इति दृश्यते। यथा- राजनीतिः, राजशास्त्रम्, राजदर्शनम्, राजधर्मः, नीतिशास्त्रम्, क्षत्रविद्या, अर्थशास्त्रम्, दण्डनीतिः इत्यादयः च। अहं राजनीतेः एतेषां नामानि कुत्रचित् केन कारणेन विवक्षितानि भवन्ति इति तद् किञ्चिद् आलोचयामि–

## राजनीति

राजनीतिः इत्यस्य शब्दस्य अर्थः भवति राज्ञः नीतिः, या नीतिः सर्वान् रञ्जयति। महाभारते राज्ञः अर्थः प्रसन्नः इति मन्यते। रञ्ज् धातुना व्युत्पत्तिवशात् पुराणेऽपि रञ्जनम् इत्यर्थे राजन् शब्दस्य प्रयोगः भवति।[3] कालिदासोऽपि राजन् इति शब्दम् अस्मिन्नेवार्थे प्रयुक्तवान्। [4]

**राजशास्त्रम्:** राजशास्त्रस्यार्थः शासकानां नियमावली इति डॉ. काशीप्रसाद जायसवाल महोदयेन उक्तः। [5]

**अश्वघोषः** स्वीयमहाकाव्ये बुद्धचरिते पूर्ववर्तिनः विचारकान् "राजशास्त्र-प्रणेतारः" इत्यनेन प्रयुङ्क्ते। [6]

**राजधर्मः**

राजधर्मस्य शाब्दिकार्थः भवति राज्ञः धर्मः अर्थात् राज्ञः कर्त्तव्यम्। राजधर्मे राज्ञः समग्रकर्तव्यः, शासन-सम्बद्धविषयः सम्मिलितः अस्ति। प्रजानां मानसिकोत्कर्षः, सद्गतिः, प्रतिष्ठा, लाभ इति एतेषां कारणं केवलं राजा इति स्वीकृत्य महाभारते राजा नर-रूपधारी देवता इति मन्यते।[7]

मनोः मतानुसारेण राज्ञः प्रसन्नतायां लक्ष्मी, पराक्रमे विजयः, क्रोधे च मृत्युः निवसति इति।[8]

राजपदराज्ययोः अभेदत्वात् राज्ञः धर्मः अथवा कर्त्तव्यः राजधर्मः इति उच्यते, एतदेव स्वीकृत्य सकलाः धर्मशास्त्राकाराः राजधर्म-विषयकवृतान्तं चर्चयन्ति। राजधर्मे राज्ञः कर्त्तव्यनिष्ठः अधिकारः, शासनं चालयितुम् आवश्यकम् अङ्गम्, आचारः, व्यवहारः, नियमः, गुणः, दोषः, प्रायश्चित्तादीनां समावेशः भवति।

महाभारते राजधर्मः एका "संसाररूपीसागरम् अतिक्रमणकारिणी नौका" इति भीष्मः कथयति। धर्मशास्त्रम् नौकां रज्जुरूपेण बध्नाति। या रज्जुः त्यागरूपीपवनप्रवाहेण स्खलिता भवति।[9]

प्राचीनभारतीयवर्णव्यवस्थायां केवलमात्रं क्षत्रियः हि शासकः रूपेण राज्यं परिचालितवानिति हेतोः राजधर्मः क्षात्रधर्मः इति उच्यते ।

**क्षत्रविद्या**

राजनीतेः अपरनाम क्षत्रविद्या इत्ययं शब्दः छान्दोग्योपनिषदि प्रयोगः कृतः।[10] पालिग्रन्थे क्षत्र-विद्या खत्तविज्जा इति नाम्ना अभिहितत्वेन इयं विद्या राजनीतिशास्त्रे एव अन्तर्भवति इति।[11]

**अर्थशास्त्रम्**

वस्तुतः अर्थशास्त्रस्य रचयिता कौटिल्यः। सः स्वरचितार्थशास्त्रम् एकं राजनीतिशास्त्रमिति मनुते। कारणं तस्यामतानुसारेण अर्थः धनम् अथवा सम्पदः द्योतकः भवति तथापि अर्थेन व्यवसायस्य उद्योगस्य च बोधः भवति। भूम्याः उपरि यः व्यवसायः चलति सोऽपि अर्थेन सह युक्तः अस्ति। अतः भूमिप्राप्त्यर्थम् यस्य साधनस्य आवश्यकता भवति तदपि अर्थशास्त्रे अन्तर्गतः भवति। शासनव्यावस्थायाः आधारभूतः अर्थः अस्ति इति मत्वा कौटिल्येन अर्थशास्त्रम् इत्याख्यः स्वग्रन्थः रचितः। अर्थशास्त्रस्य मुख्योद्देश्यः शाषनकार्ये राज्ञः मार्गनिदर्शनम् इति। नृपतन्त्रः अथवा शाषन-व्यवस्थायाः मूलसिद्धान्तस्य विवेचनम् अस्मिन्नेव ग्रन्थे अस्ति। युद्धकाले शान्तिकाले च शाषनतन्त्रः कथं भवेदिति कौटिल्य द्वारा अस्मिन् अर्थशास्त्रे ग्रथितः।

कामन्दकनीतिसारः अर्थशास्त्रमाधारीकृत्य गुप्तकाले रचितः, यत्र कौटिल्यस्यैव राज्यशासनस्य विस्तृतवर्णनमस्ति।

प्राचीनभारते राजनीतिकशास्त्रम् अर्थशास्त्रम् इति नाम्ना न केवलं कौटिल्येन रचितम् अपि तु तस्य ग्रन्थरचनापूर्वमपि अर्थशास्त्रस्य प्रारम्भः अभवत्। सः तद अनेन वाक्येन प्रमाणीकरोति—

**"पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि । प्रायशस्तानि संहृत्यैकमिदमर्थशास्त्रं कृतम्"।** [12]

**दण्डनीति**

महाकाव्येषु, स्मृतिषु, पुराणेषु राजनीतिशास्त्रम् अथवा राज्यानुशासनम् सामान्यतः दण्डनीति इति नाम्ना अभिहितम्। महाभारते अस्याः नीत्याः अपि अन्यं नाम अस्ति-पालनविद्या इति।[13]

अनेन प्रकारेण राजनीतिशास्त्रम्, राजशास्त्रम्, राजदर्शनम् तदेव विद्यायाः कश्चित् अंशभूतं भवति यस्मिन्नंशभूते राजशासनस्य विवेचनं कृतम्।

**प्राचीनभारतीय-आधुनिकभारतीययोः धर्मशास्त्रानुसारेण राज्यानुशासनस्य तुलना**

प्राचीनभारतीयराजशास्त्रं धर्मस्य अधीनस्थ भवति इति कारणेन प्राचीनभारते राज्यस्योत्पत्तेः एकमात्रमुद्देश्यं भवति धर्मसंस्थापनम् एव। राजशास्त्रस्य क्रियमानाः क्रियाः धर्मेन सह ओतप्रोतभावेन मिश्रिता भवन्ति कारणेन प्राचीनभारतीयराज्यानुशासनं धर्मानुप्राणितमिति वक्तुं शक्यते। फलस्वरूपं धर्मरहितशासनतन्त्रं प्राचीनभारते निन्दनीयमासीत्। अनेनैव कारणेन प्राचीनभारतीयराज्यानुशासनं धर्मे अन्तर्भवति इति सहजेन मन्तुं शक्यते।

आधुनिकयुगे धर्मस्य प्रभावात् राजशास्त्रं मानवसमाजकल्याणाय लोकहिताय च स्वतन्त्ररूपेण पृथग्कर्तुम् सर्वदा प्रयासः क्रियते। आधुनिकराजशास्त्रीयविचारकाणां मतमिदमस्ति यत् धर्माचार्याणां प्रभावेन राज्यानुशासने दोषः उत्पद्यते, तेन कारणेन राज्यानुशासनस्य शुद्धस्वरूपं नष्टं भवति।

आधुनिकराजशास्त्रं- प्राचीनभारतीयराज्यानुशासनमित्यनयोः स्वरूपे महान व्यत्यासः परिलक्षितः भवत्येव। किन्तु प्राचीनभारतीयराज्यानुशासनं येन धर्मेण प्रभावितमासीत् सः धर्म, आधुनिकधर्माचार्येण प्रतिपादितधर्मयोः मूलतत्त्वे बहवः भेदाः सन्ति।

भ्रान्तिवशात् प्राचीनराज्यानुशासनं सङ्कीर्णधार्मिकप्रवृत्या आधुनिकधर्माचार्याः समाजस्य सम्मुखे दर्शयन्ति। तत्र मुख्यकारणं भवति आधुनिकधर्माचार्याणां सङ्कीर्णमानसिकता, प्राचीनभारतीयराज्यानुशासनसम्बद्धाज्ञतावशात् च।

वस्तुतः प्राचीनभारतीयधर्मः एकेन देशेन, एकया जात्या, एकेन समुदायेन वा आवृतः न भवति अपि तु विश्वव्यापी भवति। अतः प्राचीनभारतीयधर्मः विश्वधर्मः अथवा मानवधर्म इत्याख्यः भवति। प्राचीनभारतीयधार्मिकपरम्परायां प्राणिमात्रेण परमकर्तव्येन स्वधर्मपालनेन समाजे सुव्यवस्था स्थापनीया । यदि एवं न भवति चेत् विश्वसंसारे अव्यवस्था व्यापृता भविष्यति येन समाजः शनैः शनैः अधस्तात् गमिष्यति, विशृङ्खलायाः सृजनं भविष्यति। अतः प्राचीनधर्माचार्याः तं विश्वधर्मं रक्षितुं श्रद्धया सह स्वकर्तव्यान् पालयितुञ्च धर्मशास्त्रं रचितवन्तः।

धर्मशास्त्रे वर्णितेन धर्मपालनेन मानवः प्राचीनभारतीयराज्यानुशासनस्य परिधिं पश्यति। प्राचीनभारतीयराज्यानुशासने ते एव नियमाः, तानि एव साधनानि, ते एव उपायाः वर्णिताः सन्ति येषां पालनेन मानवधर्मस्य सुविधापूर्वकं क्रियात्मकं रूपं दातुं शक्यते।

आधुनिकराजनीतिशास्त्रं केवलं राज्यस्य विषयस्य पूर्णं ज्ञानं प्रस्तौति, तथा एतस्य शास्त्रस्य एकमात्रमुद्देश्यं भवति— राज्यस्य प्राणिनां ऐहिकसुखनिमित्तम् उपायप्रदानमेव। अतः तत् शास्त्रं प्राणिनां पारलौकिकसुखं प्रदातुं सामर्थ्यं लेशमात्रमपि न दर्शयति। प्राचीनभारतीयराज्यानुशासनस्य क्षेत्रं प्राणिनां ऐहिकसुखपर्यन्तं सीमितं न भवति अपि तु तस्य राज्यानुशासनस्य ध्येयम् ऐहिकसुखप्रदानेन सह पारलौकिकसुखप्राप्त्यर्थं सुलभमार्गं प्रशस्तं कर्तुम् सिद्धं भवति। यस्मात् इह जगति प्राणिनः ऐहिकसुखभोगेन सह पारलौकिकसुखं प्राप्तुं कामयन्ते अथवा मोक्षप्राप्त्यर्थं सामर्थ्यवन्तः भवन्ति।[13]

राज्यानुशासनस्य क्षेत्रं विस्तृतमस्ति। कारणं तत्र सामाजिकविषयातिरिक्तः राज्यं तथा शासन-व्यवस्थासम्बन्धिनः बह्व्यः धाराः समाविष्टाः सन्ति। यस्मिन् राज्यस्य स्वरूपं, राज्यस्य आन्तरिकविषयः वाह्यविषयश्च, राज्ञः कर्त्तव्यम्, राज्ञः स्वरूपं, मन्त्री, कोशः, चतुरुपायः, सन्धिः, सन्धेः प्रकाराः, युद्धम्, युद्धस्य प्रकाराः, मानवजीवनोद्देश्यमादीनां विवेचनमस्ति। कारणं प्राचीनभारतीय-राजप्रणेतारः आदर्शसमाजस्य स्थापनमेव, मानवजीवनस्य साफल्यमेव राज्यस्य परमोद्देश्यम् इति मन्वते ।

राज्यस्य वर्णनं राज्ञः वर्णने एव अन्तर्भवति इति अनेन प्राचीनभारतराज्यानुशासनस्य एकं वैशिष्ट्यमस्ति इति ज्ञायते। एतदेव कारणमस्ति- प्राचीनभारतीयराजनीति-सम्बद्धशास्त्रं राज्ञः विभिन्नानां धर्माणां पूर्णचित्रं प्रस्तौति। हिन्दीभाषया एकं प्रवादवाक्यमस्ति—(महाभारते भीष्मस्योक्तिः)

"जिस प्रकार लगाम से घोड़े और अंकुश से हाथी को वश में किया जाता है" तथैव दण्डनीतिद्वारा प्रजानियन्त्रणं भवति। अत्र दण्डनीतेः महत्त्वं कथनप्रसङ्गे उक्तं—

दण्डनीत्या अशुभजल्पनस्य ध्वंसः तथैव भवति यथैव सूर्योदयेन अन्धकारस्य नाशः।[14]

आधुनिकयुगे राजशास्त्रं राज्यस्य पूर्णं परिचयं ददाति। अस्मिन् शास्त्रे राज्यस्य अङ्ग-प्रत्यङ्गयोः पूर्णाध्ययनं भवति । तस्य क्षेत्रं राज्ञः विविधधर्मं पर्यन्तं सीमितं न तिष्ठति। अनया दृष्ट्या प्राचीनभारतीयराज्यानुशासनाधुनिकराजशास्त्रयोः स्वरूपयोः क्षेत्रयोः च महत् पार्थक्यमस्ति एव। प्राचीनभारतीयराज्यानुशासनं धर्मप्रधानम्। धर्मेण प्रभावितः भवति। वैदिकविचारधारानुसारेण राजा राज्यस्य सम्पूर्णं क्रिया-चक्रं सञ्चालयति। राजा राज्यस्य आत्मा भवति। अतः राज्ञः विविधधर्मस्य व्याख्या, शास्त्रीयमध्ययनम् राजधर्मः इति मन्यमाने सति प्राचीनभारते राजा राज्यस्य केन्द्रमिति स्थानं दीयते।[15]

राज्ये शासनं सुचारुतया चालयितुं राज्ञा सर्वविधाः राजसम्बद्धविषयाः अवश्यमेव ज्ञातव्याः । राज्ञा केन प्रकारेण मन्त्रणा दातव्या, केन प्रकारेण च पदाधिकारिणां नियुक्तीकरणं भवेत, केन प्रकारेण युद्धस्य सन्धेः च नियमावली करणीया, राजदिनचर्या प्रस्तूय राजकार्ये समयं दातुं केन प्रकारेण कस्मिन् कार्ये व्यतीतव्यः इति एते विषयाः केनचित् मार्गदर्शकेन अवश्यमेव सूचनीयाः। तत् मार्गदर्शकं भवति धर्मशास्त्रम् । अतः धर्मशास्त्रस्य राजधर्मः यथा प्राचीनकाले राज्यानुशासनरूपेण प्रचलितः आसीत्, अस्मिन् युगेऽपि राजनीतिः धर्मशास्त्रानुसारेण भवेत् येन एकम् आदर्शभूतं राज्यं प्रतिष्ठितं भविष्यति। नागरिका सुखपूर्वकं निवसन्ति, सर्वाः सुविधाः प्राप्नुवन्ति। सदाचारेण जीवनयापनं कुर्वन्ति। तत् सर्वं सिध्यति राजनेता द्वारा, राजनेता यदि धर्मपूर्वकं एकनिष्ठपूर्वकं कर्तव्यपरायणः भूत्वा राज्यं चालयति तर्हि प्रजाः अपि शान्तिपूर्वकं जीवनधारणं कुर्वन्ति। तत् राज्यं "सर्वहितकारि राज्यमिति" कथ्यते संस्कृत वा हिन्दीभाषया। इन्टरनेशनल इन्साइक्लोपीडिया आफ सोशल साइन्सिज इत्यस्य मतम् एवम् अस्ति—

यत् राज्यं लोकहितकारी राज्यं भवति तत् राज्यं "वेलफेयर स्टेट" इति नाम्ना भूषितं भवति। यूरोप देशे वेलफेयर स्टेट निमित्तं 1601 तमवर्षे ईंलाण्डीय महाराज्ञी एलिजाबेथ Old Poor Law निर्मितवती।

तथापि दुःखस्य विषयोऽयं इदानीन्तनसमाजे अपि कुत्रापि फासिस्ट शिक्षा (Fascist Education), फासिज्म शिक्षा (Fascism Education) न दीयते।

## सन्दर्भ


1. प्राचीन भारती राज्यानुशासन, ज्योति इन्टरप्राईजिज,दिल्ली, 2009
2. शिक्षा के दार्शनिक तथा सामाजिक आधार, विनोद पुस्तक मन्दिर, आगरा-2
3. प्राचीन भारत की प्रशासनिक एवं राजनीतिक संस्थायें,श्रीसरस्वतीसदन,1998
4. महाभारत, वेद व्यास, (हिन्दी अनुवाद सहित) गीता प्रेस, गोरखपुर, 2015
5. अर्थशास्त्रम्, कौटिल्य(स०) चौखम्बा विद्या भवन, वाराणसी, 984